॥ वाल्मीकि रामायण॥

२ अयोध्याकाण्ड

अध्याय ३२

ततः सुमन्त्रमैक्ष्वाकः पीडितोऽत्र प्रतिज्ञया ।
सबाष्पमतिनिःश्वस्य जगादेदं पुनः पुनः ॥ १॥

सूत रत्नसुसम्पूर्णा चतुर्विधबला चमूः ।
रागवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम् ॥ २॥

रूपाजीवा च शालिन्यो वणिजश्च महाधनाः ।
शोभयन्तु कुमारस्य वाहिनीं सुप्रसारिताः ॥ ३॥

ये चैनमुपजीवन्ति रमते यैश्च वीर्यतः ।
तेषां बहुविधं दत्त्वा तानप्यत्र नियोजय ॥ ४॥

निघ्नन्मृगान्कुञ्जरांश्च पिबंश्चारण्यकं मधु ।
नदीश्च विविधाः पश्यन्न राज्यं संस्मरिष्यति ॥ ५॥

धान्यकोशश्च यः कश्चिद्धनकोशश्च मामकः ।
तौ राममनुगच्छेतां वसन्तं निर्जने वने ॥ ६॥

यजन्पुण्येषु देशेषु विसृजंश्चाप्तदक्षिणाः ।
ऋषिभिश्च समागम्य प्रवत्स्यति सुखं वने ॥ ७॥

भरतश्च महाबाहुरयोध्यां पालयिष्यति ।
सर्वकामैः पुनः श्रीमान्रामः संसाध्यताम् इति ॥ ८॥

एवं ब्रुवति काकुत्स्थे कैकेय्या भयमागतम् ।
मुखं चाप्यगमाच्छेषं स्वरश्चापि न्यरुध्यत ॥ ९॥

सा विषण्णा च सन्त्रस्ता कैकेयी वाक्यमब्रवीत् ।
राज्यं गतजनं साधो पीतमण्डां सुराम् इव ।
निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते ॥ १०॥

कैकेय्यां मुक्तलज्जायां वदन्त्यामतिदारुणम् ।
राजा दशरथो वाक्यमुवाचायतलोचनाम् ।
वहन्तं किं तुदसि मां नियुज्य धुरि माहिते ॥ ११॥

कैकेयी द्विगुणं क्रुद्धा राजानमिदमब्रवीत् ।
तवैव वंशे सगरो ज्येष्ठं पुत्रमुपारुधत् ।
असमञ्ज इति ख्यातं तथायं गन्तुमर्हति ॥ १२॥

एवमुक्तो धिगित्येव राजा दशरथोऽब्रवीत् ॥ १३॥

व्रीडितश्च जनः सर्वः सा च तन्नावबुध्यत ।
तत्र वृद्धो महामात्रः सिद्धार्थो नाम नामतः ।
शुचिर्बहुमतो राज्ञः कैकेयीमिदमब्रवीत् ॥ १४॥

असमञ्जो गृहीत्वा तु क्रीडितः पथि दारकान् ।
सरय्वाः प्रक्षिपन्नप्सु रमते तेन दुर्मतिः ॥ १५॥

तं दृष्ट्वा नागरः सर्वे क्रुद्धा राजानमब्रुवन् ।
असमञ्जं वृषीण्वैकमस्मान्वा राष्ट्रवर्धन ॥ १६॥

तानुवाच ततो राजा किंनिमित्तमिदं भयम् ।
ताश्चापि राज्ञा सम्पृष्टा वाक्यं प्रकृतयोऽब्रुवन् ॥ १७॥

क्रीडितस्त्वेष नः पुत्रान्बालानुद्भ्रान्तचेतनः ।
सरय्वां प्रक्षिपन्मौर्ख्यादतुलां प्रीतिमश्नुते ॥ १८॥

स तासां वचनं श्रुत्वा प्रकृतीनां नराधिप ।
तं तत्याजाहितं पुत्रं तासां प्रियचिकीर्षया ॥ १९॥

इत्येवमत्यजद्राजा सगरो वै सुधार्मिकः ।
रामः किमकरोत्पापं येनैवमुपरुध्यते ॥ २०॥

श्रुत्वा तु सिद्धार्थवचो राजा श्रान्ततरस्वनः ।
शोकोपहतया वाचा कैकेयीमिदमब्रवीत् ॥ २१॥

अनुव्रजिष्याम्यहमद्य रामं
राज्यं परित्यज्य सुखं धनं च ।
सहैव राज्ञा भरतेन च त्वं
यथा सुखं भुङ्क्ष्व चिराय राज्यम् ॥ २२॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for

his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com